तज्जातीयैर्नरैः सम्यक् दाहाद्याः सकलाः क्रियाः ॥”)
अथ शवदाहविधिर्यथा,—

“गतप्राणं ज्ञात्वा पुत्त्रादिः स्नात्वा श्वभ्रं कृत्वा स्थापयेत्। ततो गतप्राणं स्नापयित्वा वाससा सर्व्वशरीरमाच्छाद्यास्तीर्णकुशायां भूमौ दक्षिणाशिरसं स्थापयेत्। ततो घृतेनाभ्यज्य,

ॐ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः।
कुरुक्षेत्रञ्च गङ्गाञ्च यमुनाञ्च सरिद्वराम् ॥
कौशिकीं चन्द्रभागाञ्च सर्व्वपापप्रणाशिनीम्।
भद्रावकाशां गण्डकीं सरयूं पनसां तथा ॥
वैणवञ्च वराहञ्च तीर्थं पिण्डारकं तथा।
पृथिव्यां यानि तीर्थानि सरितः सागरास्तथा ॥

इति चिन्तयित्वा पुनः स्नापयेत्। वस्त्रान्तरं परिधाप्य उपवीतमुत्तरीयञ्च दत्त्वा चन्दनादिनोपलिप्य कर्णनासिकानेत्रद्वयमुखात्मकेषु सप्तच्छिद्रेषु सप्तसुवर्णखण्डिकास्तदभावे कांस्यादिखण्डिका निःक्षिपेत् ततो वस्त्रान्तरेणाच्छाद्य वहेयुः। वहनकाले आमपात्रस्थं तदन्नार्द्धं वर्त्मार्द्धे त्यजेत् अर्द्धं पिण्डार्थमवशेषयेत्। ततोऽग्निदाता पुत्त्रादिश्चिताभूमौ गत्वा तदन्नार्द्धं तिलसहितं पिण्डदानेतिकर्त्तव्यतया उत्सृजेत्। सा यथा,—गोमयेनोपलिप्तायां भूमौ पातितवामजानुः प्राचीनावीती कुशमूलेन ॐ अपहता असुरा रक्षांसि वेदिषद इत्यनेन दक्षिणाग्ररेखां कुर्य्यात् तदुपरि कुशानास्तीर्य्य ॐ एहि प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्व्विणेभिर्देह्यस्मभ्यं द्रविणेह भद्रं रयिञ्च नः सर्व्ववीरं नियच्छ इत्यावाह्य सतिलजलपात्रं वामहस्तात् दक्षिणहस्तेन गृहीत्वा ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नवनेनिक्ष्व इत्यवनेजयेत्। ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्तेऽन्नमुपतिष्ठताम् इति वामहस्तगृहीतामपात्रादन्नं सतिलं दक्षिणहस्तेन गृहीत्वा कुशोपरि दद्यात्। पिण्डपात्रप्रक्षालनजलेन तदुपरि प्रत्यवनेजनं तूष्णीं गन्धादिदानं सामगेतरेषान्तु नावाहनमिति विशेषः। ततः पुत्त्रादिः स्नात्वा चितां रचयित्वा तत्र दारुचयं कुर्य्यात्। तदुपरि वस्त्रद्वयसहितं दक्षिणाशिरसं सामगमधोमुखं पुमांसं न्यसेत्। नार्य्यास्तूत्तानदेहत्वं सामगेतरेषां उत्तराशिरस्त्वम्। ततो देवाश्चाग्निमुखाः सर्व्वे हुताशनं गृहीत्वा एनं दहन्तु इति मनसा ध्यात्वाग्निं गृहीत्वा,

ॐ कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् ॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम्।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स गच्छतु ॥

इति पठित्वा त्रिः प्रदक्षिणीकृत्य दक्षिणामुखः शिरःस्थाने दद्यात्। स्त्रीदाहे नरमित्यत्र पाठः नं. नारीमित्यूहः। ततो दाहे हुते प्रादेशप्रमाणाः सप्तकाष्ठिका गृहीत्वा चिताग्निं सप्तवारान् प्रदक्षिणीकृत्य सप्तकाष्ठिका एकैकक्रमेण चिताग्नौ प्रक्षिपेत्। ततः कुठारेण क्रव्यादाय नमस्तुभ्यमिति मन्त्रं सकृत् पठित्वा चितास्थज्वलद्दारूपरि सप्तप्रहारा देयाः तमग्निमपश्यद्भिर्व्वामावर्त्तेन स्नातुं नदी गन्तव्या। नग्नं शवं न दहेत् शवसम्बन्धिवस्त्रादि श्मशानवासिचाण्डालादिभ्यो दद्यात्। सूतिकां रजस्वलाञ्च वस्त्रान्तरावृतां सतिलपञ्चगव्यं जलपूर्णकुम्भं आपोहिष्ठीयवामदेव्यादिभिरभिमन्त्र्य स्नापयित्वा दहेदिति विशेषः। गर्भवत्यास्तु गर्भं निःसार्य्य स्थानान्तरे निःक्षिप्य तस्या दाहः कार्य्यः। ततो जलसमीपं गत्वा पुत्त्रादयः प्रयोगदानाभिज्ञं श्यालकादिकं प्रार्थयेयुः। उदकं करिष्याम इति तेन च कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते कुरुध्वमेवेतरस्मिन् इत्युत्तरे दत्ते वृद्धपुरःसरमवतरणं जले। ततः परिहितवस्त्रं प्रक्षाल्य तदेव परिधाय प्राचीनावीतिनो दक्षिणामुखाः ॐ अपनः शोशुचदघमित्यनेन मन्त्रेण वामहस्तानामिकया अप आलोड्य एकवस्त्राः सकृन्निमज्योन्मज्याचम्य दक्षिणामुखास्तर्पयेयुः। ततः ॐ अमुकगोत्रं प्रेतममुकदेवशर्म्माणं तर्पयामीति सामगानां प्रयोगः यजुर्व्वेदिनान्तु अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं तृप्यस्वेति एकाञ्जलिदानमावश्यकं अञ्जलित्रयदाने फलातिशयः। ततः पुनः स्नात्वा जलादुत्थानं बालपुरःसरं कार्य्यम्। ततः शाद्वले उपविश्य,

मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः।
कर्म्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रिया कार्य्या विधानतः ॥

इति चिन्तयित्वा गृहद्वारं समागत्य निम्बपत्त्राणि दन्तैः खण्डयित्वा शमी पापं शमयत्विति शमीं स्पृष्ट्वा अश्मेव स्थिरो भूयासं इत्यश्मानं पदा स्पृष्ट्वा अग्निर्नः शर्म्म यच्छतु इति अग्निं स्पृष्ट्वा वृषभच्छागयोर्म्मध्ये स्थित्वा स्योगितिमन्त्रेण द्वावपि स्पृष्ट्वा गोमयमुदकं गौरसर्षपांश्च स्पृष्ट्वा बालपुरःसरा गृहं विशेयुः। दिवा चेद्दाहस्तदा रात्रौ ग्रामप्रवेशः रात्रौ चेत्तदा दिवसे। अशक्तौ ब्राह्मणानुमतिं गृहीत्वा कालप्रतीक्षणं विना प्रवेष्टव्यम्।” इति शुद्धितत्त्वम् ॥

दाहकः, पुं, (दहतीति। दह + ण्वुल्।) चित्रकः। रक्तचित्रकः। इति राजनिर्घण्टः ॥ दाहकर्त्तरि, त्रि ॥ (यथा, याज्ञवल्क्ये ।२।२८५।
“क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः।
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना ॥”
उष्णगुणः। यथा, राजनिर्घण्टे।
“काञ्जिकं दधितैलन्तु वलीपलितनाशनम्।
दाहकं गात्रशैथिल्यं बल्यं सन्तर्पणं परम् ॥”)

दाहज्वरः, पुं, (दाहप्रधानो ज्वरः।) गात्रज्वालायुक्तज्वररोगः। तस्यौषधम्। यथा,—
“पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै।
दाहं विनाशयेद्दाहज्वरञ्च परमेश्वर ! ॥”
इति गारुडे १९३ अध्यायः ॥

दाहनं, क्ली, (दह + णिच् + भावे ल्युट्।) भस्मीकरणप्रेरणम्। दाहकरान इति भाषा ॥ (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। १। ६२।
“कलौ कलुषशुष्केध्मदाहनायाग्निरूपिणी ॥”)

दाहसरः, पुं, (दाहार्थं स्रियते गम्यतेऽस्मिन्निति। सृ + अप्।) श्मशानम्। इति त्रिकाण्डशेषः ॥

दाहहरणं, क्ली, (दाहस्य हरणं यस्मात्।) वीरणमूलम्। इति शब्दचन्द्रिका ॥

दाहागुरु, क्ली, (दाहाय यदगुरु।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। दाहनागुरु २ दाहकाष्ठम् ३ धूपागुरु ४ तैलागुरु ५ पूरम् ६ वनवल्लभम् ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। केशवर्द्धनत्वम्। वर्ण्यत्वम्। केशदोषनाशित्वम्। सततसौगन्ध्यविस्तारकारित्वञ्च। इति राजनिर्घण्टः ॥

दिक्, [श्] स्त्री, (दिशति अवकाशं ददाति या। दिश + “ऋत्विग्दधृगिति।” ३।२।५९। इति क्विन्-प्रत्ययेन साधुः।) पूर्व्वपश्चिमदक्षिणोत्तरादिरूपा। तत्पर्य्यायः। ककुप् २ काष्ठा ३ आशा ४ हरित् ५। इत्यमरः। १।३।८ ॥ निदेशिनी ६ दिशा ७ ककुभः ८ हरितः ९ गौः १०। इति शब्दरत्नावली ॥ अपि च। आताः १ आशाः २ उपराः ३ आष्टाः ४ काष्ठाः ५ व्योम ६ ककुभः ७ हरितः ८ इत्यष्टौ दिङ्नामानि। इति वेदनिघण्टौ १ अध्यायः ॥ अस्या व्युत्पत्तिर्यथा,—
“कृत्वैवमवधिं तस्मादिदं पूर्व्वञ्च पश्चिमम्।
इति देशो निर्दिश्येत यया सा दिगिति स्मृता ॥”
तस्या वायोर्गुणाः।
“त्रिस्रवायुरनायुष्यः प्राणिनां नैकदोषकृत्।
सर्व्वर्त्तुनिन्दको हन्ता कृत्योत्पातपुरःसरः ॥”
इति राजवल्लभः ॥ * ॥
सा दशधा यथा। पूर्व्वा १ आग्नेयी २ दक्षिणा ३ नैरृती ४ पश्चिमा ५ वायवी ६ उत्तरा ७ ऐशानी ८ ऊर्द्ध्वम् ९ अधः १० ॥ * ॥ तासां उत्पत्तिर्यथा,—

महातपा उवाच।

“शृणु राजन्नवहितः प्रजापाल ! कथामिमाम्।
यथा दिशः समुत्पन्नाः श्रोत्रेभ्यः पृथिवीपते ! ॥
ब्रह्मणः सृजतः सृष्टिमादिसर्गे समुत्थिते।
चिन्ताभून्महती को मे प्रजाः सृष्टा धरिष्यति ॥
एवं चिन्तयतस्तस्य अवकाशं प्रजल्पिनः।
प्रादुर्ब्बभूवुः श्रोत्रेभ्यो दश कन्या महाप्रभाः ॥
पूर्व्वा च दक्षिणा चैव प्रतीची चोत्तरा तथा।
ऊर्द्धाध एव मुख्याः कन्या ह्यासंस्तदा नृप ! ॥
तासां मध्ये चतस्रस्तु कन्याः परमशोभनाः।
याःपश्यन्त्यो महाभागा गाम्भीर्य्येण समन्विताः ॥